श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ निर्वेदपद्धतिः एकत्रिंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ निर्वेदपद्धतिः एकत्रिंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

प्रपद्ये पादुकां देवीं परविद्यामिव स्वयम्।
यामर्पयति दीनानां दयमानो जगद्गुरुः॥ ३१.१ ॥

अपि जन्मनि पादुके! परस्मिन्
अनघैः कर्मभिरीदृशो भवेयम्।
य इमे विनयेन रङ्गभर्तुः
समये त्वां पदयोः समर्पयन्ति॥ ३१.२ ॥

परिवर्तयिता पितामहादीन्
त्वमिवानन्तमसौ वहत्यनेहा।
अधुनाऽपि न शौरिपादुके! त्वां
अनघालम्बनमभ्युपैति चित्तम्॥ ३१.३ ॥

कमलाध्युषिते निधौ निरीहे
सुलभे तिष्ठति रङ्गकोशमध्ये।
त्वयि तत्प्रतिलम्भने स्थितायां
परमन्विच्छति पादुके! मनो मे॥ ३१.४ ॥

यद्यप्यहं तरळधीस्तव न स्मरेयं
न स्मर्तुमर्हति कथं भवती स्वयं मे।
वत्से विहारकुतुकं कलयत्यवस्था
का नाम केशवपदावनि! वत्सलायाः॥ ३१.५ ॥

मातर्मुकुन्दकरुणामपि निह्नुवानात्
किं वा परं किमपि किल्बिषतो मदीयात्।

गाढं गृहीतचरणागमनापदेशात्
    तत्प्रेरणप्रणयिनी तव चेन्न लीला॥ ३१.६ ॥

क्षीबाऽसि काञ्चनपदावनि ! कैटभारेः
    पादारविन्दमकरन्दनिषेवणेन।
देवि ! त्वदन्तिकजुषः कथमन्यथा मे
    दीनाक्षराणि न शृणोषि दयाधिका त्वम्॥ ३१.७ ॥

मातस्त्वदर्पितभरस्य मुकुन्दपादे
    भद्रेतराणि यदि नाम भवन्ति भूयः।
कीर्तिः प्रपन्नपरिरक्षणदीक्षितायाः
    किं न त्रपेत तव काञ्चनपादरक्षे॥ ३१.८ ॥

दौवारिकद्विरसनप्रबलान्तरायैः
    दूये पदावनि ! दुराढ्यबिलप्रवेशैः।
तद्रङ्गधामनिरपायधनोत्तरायां
    त्वय्येव विश्रमय मङ्क्षु मनोरथं मे॥ ३१.९ ॥

व्यामुह्यतां त्रिविधतापमये निदाघे
    मायाविशेषजनितासु मरीचिकासु।
संस्पृष्टशौरिचरणा चरणावनि ! त्वं
    स्थेया स्वयं भवसि नश्वरमे पुमर्थे॥ ३१.१० ॥

अच्छेद्यया विषयवागुरया निबद्धान्
    दीनान् जनार्दनपदावनि ! सत्पथस्था।
प्रायः क्रमेण भवती परिगृह्य मौळौ
    कालेन मोचयति नः कृपया सनाथा॥ ३१.११ ॥

संवाहिका चरणयोर्मणिपादरक्षे !
    देवस्य रङ्गवसतेर्दयिता ननु त्वम्।
कस्त्वां निवारयितुमर्हसि योजयन्तीं
    मातः ! स्वयं गुणगणेषु ममापराधान्॥ ३१.१२ ॥

किं वा भविष्यति परं कलुषैकवृत्तेः
    एतावताऽप्यनुपजातमनेहसा मे।
एकं तदस्ति यदि पश्यसि पादुके ! ते
    पद्मासहायपदपङ्कजभोगसाम्यम्॥ ३१.१३ ॥

विविधविषयचिन्तासन्तताभिश्चिरं मां
    जनितकलुषमित्थं देवि ! दुर्वासनाभिः।
पदसरसिजयोस्त्वं पादुके रङ्गभर्तुः
    परिमळपरिवाहैः पावनैर्वासयेथाः॥ ३१.१४ ॥

शरणमधिगतस्त्वां शार्ङ्गिणः पादरक्षे !
    सकृदपि विनियुक्तं त्वत्सपर्याधिकारे।
पुनरपि कथमेनं हस्तमुत्तानयेयं
    धनमदमुदितानां मानवानां समाजे॥ ३१.१५ ॥

यदि किमपि समीहे कर्म कर्तुं यथावत्
    प्रतिपदमुपजातैः प्रत्यवेयां निमित्तैः।
अवधिरसि यदि त्वं तत्र नैमित्तिकानां
    शरणमिह न किं मे शौरिपादावनि ! स्याः॥ ३१.१६ ॥

अन्तर्लीनैरघपरिकरैराविला चित्तवृत्तिः
    शब्दादीनां परवशतया दुर्जयानीन्द्रियाणि।
विष्णोः पादप्रणयिनि ! चिरादस्य मे दुःखसिन्धोः
    पारं प्राप्यं भवति परया विद्यया वा त्वया वा॥ ३१.१७ ॥

गोमायूनां मलयपवने तस्कराणां हिमांशौ
    दुर्वृत्तानां सुचरितमये सत्पथे त्वत्सनाथे।
तत्त्वज्ञाने तरळमनसां शार्ङ्गिणः पादरक्षे !
    नित्योद्वेगो भवति नियतेरीदृशी दुर्विनीतिः॥ ३१.१८ ॥

काले जन्तून् कलुषकरणे क्षिप्रमाकारयन्त्याः
    घोरं नाहं यमपरिषदो घोषमाकर्णयेयम्।

श्रीमद्रङ्गेश्वरचरणयोरन्तरङ्गैः प्रयुक्तं
सेवाह्वानं सपदि शृणुयां पादुकासेवकेति॥ ३१.१९ ॥

पाषाणकल्पमन्ते परिचितगौतमपरिग्रहन्यायात्।
पतिपदपरिचरणार्हं परिणमय मुकुन्दपादरक्षिणि ! माम्॥ ३१.२० ॥

॥ इति श्रीपादुकासहस्रे निर्वेदपद्धतिः एकत्रिंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥